**M**

No. of Printed Pages : 8

# प्रथमं सङ्कलनात्मकं मूल्याङ्कनम् -I (सत्रम् 2015-16)

## विषय—संस्कृतम्

## कक्षा —दशमी

**अवधिः — होरात्रयम्** **पूर्णाङ्काः — 90**

**निर्देशाः —**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति —

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | 10 अङ्काः |
| खण्डः 'ख' | रचनात्मकं-कार्यम् | 15 अङ्काः |
| खण्डः 'ग' | अनुप्रयुक्त-व्याकरणम् | 30 अङ्काः |
| खण्डः 'घ' | पठित-अवबोधनम् | 35 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः 'क'

### अपठित-अवबोधनम् (10 अङ्काः)

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत—** 2 + 2 + 4 + 2 = 10

प्रकृत्या अस्मभ्यम् शुद्धम् पवित्रं च पर्यावरणम् प्रदत्तम्। परं मानवैः स्वकुकृत्यैः इदं प्रदूषितम् कृतम्। प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णः विश्वः चिन्ताकुलः अस्ति। प्रदूषणनिवारणस्य उपायेषु 'वृक्षारोपणम्' सर्वोत्कृष्टं मतम्। प्रदूषणसमस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वृक्षकर्तनम् आरब्धम्। वृक्षाः मानवजीवनस्य प्राणभूताः। तेषामभावे च विषाक्तवायुः अतिवृष्टिः, अनावृष्टिः भूक्षरणम् च भवति। प्रकृतौ सन्तुलनस्थापनार्थं वृक्षरक्षणम् वृक्षारोपणम् च आवश्यकम्। विषाक्तवायोः शोषणस्य सामर्थ्यम् वृक्षेषु एवास्ति। येन वातावरणं शुद्ध भवति। नष्टप्रायाणां पशुपक्षिणाम् जातीनाम् च रक्षा अपि अनेनैव संभवा। अतः वृक्षारोपणम् अधिकाधिकं कर्तव्यम्। यतो हि 'वृक्षो रक्षति रक्षितः'।

I **एकपदेन उत्तरत—** 2

(i) रक्षितः कः रक्षति ?

(ii) वृक्षाः कस्य प्राणभूताः ?

**II** **पूर्णवाक्येन उत्तरत–** **2**

(i) प्रदूषणसमस्या कदा उपस्थिता अभवत् ?

(ii) वृक्षाणाम् अभावे किम् भविष्यति ?

**III** **यथानिर्देशम् उत्तरत–** **4**

(i) 'इदं प्रदूषितं कृतम्' अत्र इदम् सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) वृक्षाय (ब) पर्यावरणाय

(स) वृष्ट्यै (द) प्रकृत्यै

(ii) 'सम्पूर्ण:' इति विशेषणपदस्य किं विशेष्यपदम् ?

(अ) वृक्ष: (ब) विश्व:

(स) मानव: (द) पर्यावरणम्

(iii) 'प्रदत्तम्' इति क्रियापदस्य किं कर्तृपदम् ?

(अ) अस्मभ्यम् (ब) प्रकृत्या

(स) शुद्धम् (द) पर्यावरणम्

(iv) 'समीर:' इति पदस्य समानार्थकं पदं गद्यांशात् चित्वा लिखत–

(अ) वायु: (ब) पर्यावरण:

(स) शुद्धं (द) रक्षित:

**IV** **अस्य अनुच्छेदस्य शीर्षकं लिखत।** **2**

**खण्ड: 'ख**

**रचनात्मकं-कार्यम् (15 अङ्का:)**

**2.** **भवान् ललित:। भवान् गत-परीक्षायाम् उत्तीर्ण:। एतम् उपलक्ष्य पुस्तकं प्रेषितवते मित्राय लिखिते धन्यवाद-पत्रे रिक्तस्थानानि मञ्जूषास्थ-पदै: पूरयत–** **½ × 10 = 5**

त्यागनगरम्

मुम्बईत:

तिथि: ...........................

प्रियमित्र (i) ........................ !

सप्रेम नमस्कार:।


अत्र सर्वं (ii) ...................... । तत्राप्यस्तु इति प्रार्थये। अहं गतपरीक्षायां समीचीनान् (iii)................ प्राप्य उत्तीर्ण इत्युपलक्ष्ये बहूनि विविधानि पारितोषिकानि (iv)................ । तेन अहं तुष्ट: तथापि भवता प्रेषितं (v) ................ इति पुस्तकं न केवलं मम बुद्ध्यै अपितु (vi)................अपि उपकारकं भविष्यति इत्यत्र नास्ति कोऽपि सन्देह:। अस्मिन् (vii)................ भवत्सदृशमित्राणि विरलानि सन्ति। (viii) ................ आत्मानं भाग्यवन्तं मन्ये। भवत: (ix) ...................... मम प्रणामा:। भूयोभूयो धन्यवाद:।

भवत: प्रियमित्रम्

(x) ................

**मञ्जूषा**—अङ्कान्, जीवनाय, प्रियव्रत, मातापितृभ्यां, ललितः, कुशलम्, आगतानि, अहम्, काले, नीतिकथाः।

**3. चित्रं दृष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनम् पञ्चसंस्कृतवाक्येषु कुरुत—** **2 × 5 = 10**



**मञ्जूषा**—हरिद्वारे, तीर्थम्, गङ्गाः, ध्वजाः, स्नानं, मन्दिराणि, शिखरेषु, पूजां, कीर्तनम्, दीप्तम्, पुष्पम्, अर्चनाम्, जनाः, भक्ताः

**अथवा**

**'चिकित्सालयस्य वर्णनम्' इति विषयम् अधिकृत्य मञ्जूषासहायतया च संस्कृतेन पञ्चवाक्यानि लिखत।**

**मञ्जूषा**—प्राकृतिकं, वातावरणं, स्वास्थ्यप्रदं, भोनजम्, वायुः, प्रातःकाल-भ्रमणम्, हितकरम्, स्वास्थ्यम्, प्रतिदिनं, अहर्निशम्, सेवाम्, चिकित्सकाः, मिलन्ति, आगच्छन्ति, पश्यन्ति, जना, रोगिणः, स्वस्थाः, विनम्राः, सर्वविधः उपचारः, चिकित्सा।

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् (30 अङ्काः)

**4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत—** **1 × 5 = 5**

(i) तैः <u>तत् + शिला</u> दृश्यते।

(ii) <u>शान्तः</u> भव।

(iii) रामेण <u>साधु + उक्तम्</u>।

(iv) <u>मुनिरागतः</u>।

(v) तस्य नाम <u>महा + इन्द्रः</u> अस्ति।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत—** **1 × 6 = 6**

(i) <u>महापुरुषः</u> सर्वैः पूजनीयः भवति—

(क) महान् पुरुषाः (ख) महान्तः पुरुषः

(ग) महत् पुरुषः (घ) महान् पुरुषः

(ii) जिह्वायाः लोलुपतया मेषः महानसं प्रविशति—

(क) जिह्वायालोलुपतया (ख) जिह्वालोलुपता

(ग) जिह्वालोलुपतया (घ) जिह्वालोलुपतायाः

(iii) त्रयाणां लोकानां समाहारः प्रलयकाले अपि तिष्ठति—

(क) त्रिलोकः (ख) त्रिलोकम्

(ग) त्रिलोकी (घ) त्रिलोकाः

(iv) किं हेयम् ? अकार्यम्—

(क) न अकार्यस्य (ख) न कार्यम्

(ग) न कार्यः (घ) न कार्येण

(v) नवरात्रम् हिन्दूनां प्रसिद्धं पर्व—

(क) नव रात्रीणां समाहारः (ख) नवानां रात्रीणां समाहारः

(ग) नव रात्रिभिः समाहारः (घ) नव रात्रिम् समाहारः

(vi) अद्य रात्रौ पूर्णः चन्द्रः दर्शनीयः—

(क) पूर्णचन्द्रः (ख) पूर्णचन्द्रम्

(ग) पूर्णचन्द्रा (घ) पूर्णचन्द्रस्य

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं लिखत—** **1 × 5 = 5**

(i) अस्माभिः वृक्षाः रक्षणीयाः।

(ii) दुश्चरितानि त्यक्तव्यानि।

(iii) विद्या + मतुप् सर्वत्र आदरं लभते।

(iv) गुणिनाम् सर्वत्र मानः भवति।

(v) मूल + ठक् ज्ञानम् प्रशंसनीयं भवति।

**7. अधोलिखितेषु वाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत—** **1 × 5 = 5**

(i) ह्यः अस्माकम् विद्यालये मम मात्रा सह अनुजा ................ आगच्छत्।

(ii) देवेशस्य गृहे तस्य पिता ................ व्यवहारकुशलः।

(iii) वने पशवः ................ भ्रमन्ति।

(iv) परीक्षाम् ................ मूल्यांकनम न भवति।

(v) अस्माभिः समयः ................ न यापनीयः।

| |
|---|
| **मञ्जूषा**—अपि, एव, वृथा, विना, इतस्ततः |

**8. अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत—** **1 × 5 = 5**

अध्यापकः—त्वम् कुत्र गच्छसि ?

छात्रः—अहम् तु क्रीडाक्षेत्रम् (i) ................ । (गम्)

अध्यापकः—त्वया तत्र किमर्थं (ii) ................ । (गम्)

छात्रः—(iii) ................ तत्र क्रीडितुं गम्यते। (अस्मद्)

अध्यापकः—त्वम् कां क्रीडां (iv) ................ । (क्रीड्)

छात्रः—मया तत्र प्रथमं हॉकी (v) ................ क्रीड्यते। (क्रीडा)

**9. अधोलिखितेषु वाक्येषु अङ्कानां स्थाने समयवाचकसंस्कृतसंख्यापदानि लिखत—** **1 × 4 = 4**

(i) अहम् प्रातः <u>5.30</u> वादने उत्तिष्ठामि।

(ii) उत्थाय <u>5.45</u> वादने दन्तधावनम् करोमि।

(iii) <u>6.00</u> वादने व्यायामं करोमि।

(iv) <u>7.15</u> वादने स्नानम् करोमि। ततः विद्यालयम् गच्छामि।

## खण्डः 'घ'

## पठित अवबोधनम् (35 अङ्काः)

**10. अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत—** **2 + 1 + 2 = 5**

कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यम् मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठ-मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म। मेषस्य सूपकाराणां कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्-'एतेषां कलहो न वानराणां हिताय।'

**(I) एकपदेन उत्तरत—** **2**

(i) भूपतेः नाम किम् आसीत् ?

(ii) जिह्वालोलुपतया कः महानसं प्रविश्य यत् पश्यति तत् भक्षयति ?

**(II) पूर्णवाक्येन उत्तरत—** **1**

वानरयूथपतिः मेष-सूपकाराणां कलहं दृष्ट्वा किम् अचिन्तयत् ?

**(III) निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत—** **2**

(i) 'पश्यति' इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) वानरः (ब) सूपकारः

(स) मेषः (द) नृपः

(ii) "तम् आशु ताडयन्ति स्म" अत्र 'तम्' पदं कस्मै प्रयुक्तम् ?

(अ) नृपाय (ब) वानराय

(स) मेषाय (द) सूपकाराय

11. **अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–** 2 + 1 + 2 = 5

माधुर्यमक्षरव्यक्तिः
पदच्छेदस्तु सुस्वरः
धैर्यं लयसमर्थं च
षडेते पाठका गुणाः।।

(I) **एकपदेन उत्तरत–** 2

(i) पाठकस्य कति गुणाः सन्ति ?

(ii) माधुर्यादिकं कस्य गुणाः भवन्ति ?

(II) **पूर्णवाक्येन उत्तरत–** 1

पाठकस्य गुणान् लिखत।

(III) **उचितमुत्तरं चित्वा लिखत–** 2

(i) पाठकाः इति पदस्य विशेषणपदं किम् ?

(अ) माधुर्यम् (ब) सुस्वरः
(स) धैर्यम् (द) एते

(ii) 'परुषस्वरः' इत्यस्य विलोमत्वेन किं पदमस्ति ?

(अ) धैर्यम् (ब) व्यक्तिः
(स) सुस्वरः (द) च

12. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–** 2 + 1 + 2 = 5

शिष्यः–जाड्यम् किम् ?

गुरुः–पाठतोऽप्यनभ्यासः।

शिष्यः–नलिनीदलगतजलवत्तरलं किम् ?

गुरुः–यौवनं धनं आयुः च।

शिष्यः–कस्य वशे प्राणिगणः ?

गुरुः–सत्यप्रियभाषिणो विनीतस्य।

शिष्यः–कः बधिरः।

गुरुः–यो हितानि न शृणोति।

**प्रश्नाः**

(I) **एकपदेन उत्तरत–** 2

(i) पाठतः अपि अनभ्यासः कः कथितः अत्र ?

(ii) यः हितानि न शृणोति सः कः ?

**(II) पूर्णवाक्येन उत्तरत—** 1

प्राणिगणः कस्य वशे भवन्ति ?

**(III) निर्देशानुसारशुद्धम् उत्तर विकल्पेभ्यः चित्वा लिखत—** 2

(i) 'शृणोति' क्रियापदस्य कर्तृपदं किम् ?

(अ) कः (ब) यः

(स) सत्यप्रियः (द) प्राणिगणः

(ii) 'मूर्खत्वम्' पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

(अ) तरलं (ब) धनं

(स) यौवनं (द) जाड्यम्

**13. मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थंपूरयत—** ½ × 8 = 4

**(I)** चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।

**भावार्थः**—हे कृष्ण ! (i) ..................... चञ्चलम् अस्ति एतत् (ii) ..................... बलवत् दृढं च वर्तते। अस्य (iii) ..................... अहं वायोः अवरोधनम् इव (iv) ..................... मन्ये।

**(II)** अनद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते।।

**भावार्थः**—तादृशम् एव (v) ..................... वक्तव्यं यत् (vi) ..................... न भवेत्। वाक्यं सत्यं प्रियं (vii) ..................... च भवेत्। सद्ग्रन्थानाम् (viii) ..................... तथा अधीतस्य अभ्यसनं वाण्याः तपः कथ्यते।

| |
|---|
| **मञ्जूषा**—उद्वेगकरम्, निग्रहम्, अध्ययनम्, मनः, कठिनम्, वाक्यम्, प्रमथनशीलम्, हितकरम्। |

**14. समुचितः पदैः अधोलिखितश्लोकस्य अन्वयं पूरयत—** 1 × 4 = 4

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी।।

**अन्वय**—यथा मधुरभाषिणी (i) ..................... पुरुषम् (ii) ..................... तथा शीतलम् सलिलम् न, (iii) ..................... (अपि) न, (iv) ..................... छाया च न (प्रह्लादयति)।

**15. वाक्येषु रेखाङ्कितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत—** 1 × 4 = 4

(i) तस्य पुत्राः वानरयूथं <u>विविधैः भोज्यपदार्थैः</u> पुष्टिं नयन्ति स्म।

(ii) <u>राजगृहे</u> बालवाहनयोग्यं मेषयूथम् आसीत्।

(iii) ते सूपकाराः <u>काष्ठेन</u> तम् ताडयन्ति स्म।

(iv) <u>तेषां</u> कलहम् अवेक्ष्य वानरयूथपतिः अचिन्तयत्।

**16. अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनः लेखनीयानि–** **½ × 8 = 4**

(i) सः महान् राजा अभवत्।

(ii) देशान्तरेभ्यः अपि जनाः तं देशम् आयान्ति स्म।

(iii) तत्र सः अर्थिनां विरलाम् संख्याम् अपश्यत्।

(iv) जनाः दानं प्राप्य सन्तुष्टाः अभवन्।

(v) बोधिसत्त्वः बाल्यात् एव दयालुः आसीत्।

(vi) सः नगरस्य समन्तात् दानशालाः अकारयत्।

(vii) एकदा राजा दानशालासु विचरति स्म।

(viii) सः प्रजाः पुत्रवत् अपालयत्।

**17. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत–** **1 × 4 = 4**

(i) कुवाक्यान्तं च सौहृदम्–

(अ) सुहृदयम् (ब) तडागः

(स) मित्रता (द) शत्रुता

(ii) यूथपतेः वचनं अप्रियं मत्वा कपयः असहन्–

(अ) स्वीकृत्य (ब) बुद्ध्वा

(स) उपागम्य (द) श्रुत्वा

(iii) मेषः महानसं प्रविश्य यद् पश्यति तद् खादति–

(अ) मानसरोवरं (ब) गृहम्

(स) पाकशालाम् (द) पाठशालाम्

(iv) मे घोटकाः दग्धाः–

(अ) वानराः (ब) कुक्कुराः

(स) अश्वाः (द) खगाः